नैष्किकः, पुं, ( निष्के स्वर्णे टङ्कागारे वा नियुक्तः । निष्क+"तत्र नियुक्तः ।" ४ । ४ । ६९ । इति ठक् ।) रूप्याध्यक्षः । इत्यमरः ।२ । ८ । ७ ॥ टङ्कपतिः । पुरुषाश्वादिरूपं गठितं रजतं रूप्यं तस्याध्यक्षः । इति भरतः ॥ ( त्रि, निष्केण क्रीतं निष्कस्य विकारो वा । "क्रीतवत् परिमाणात् ।" ४ । ३ । १५६ । इत्यतिदेशात् "असमासे निष्कादिभ्यः ।" ५ ।१ ।२० । इति ठक् । निष्कक्रीते । निष्कविकारे ॥ )

नैष्ठिकः, त्रि, ( निष्ठा विद्यतेऽस्येति । निष्ठा+मत्वर्थीयष्ठक् ।) ब्रह्मचर्य्यं कृत्वा यावज्जीवं गुरुकुले यो वसति सः । यथा,—

"नैष्ठिको ब्रह्मचारी च वसेदाचार्य्यसन्निधौ ।
तदभावेऽस्य तनये पत्न्यां वैश्वानरेऽपि वा ॥
अनेन विधिना देहं साधयेद्विजितेन्द्रियः ।
ब्रह्मलोकमवाप्नोति न चेह जायते पुनः ॥"
इति गरुड़पुराणम् ॥

( यथा, महाभारते । ३ । २८२ । २७ ।
"शतयोजनविस्तारं न शक्ताः सर्व्ववानराः ।
क्रान्तुं तोयनिधिं वीरा नैषा वो नैष्ठिकी मतिः ॥")

नैसर्गिकः, त्रि, (निसर्गादागतः । निसर्ग+ठक् ।) स्वाभाविकः । ( यथा, रघुः । ५ । ३७ ।
"रूपं तदोजस्वि तदेव वीर्य्यं
तदेव नैसर्गिकमुन्नतत्वम् ॥" )
यथाच कल्किपुराणे २६ अध्याये ।
"एकान्तमस्वामियं भक्तिः क लब्धा परमात्मनः ।
कस्य वा शिक्षिता राजन् किंवा नैसर्गिकी तव ॥"

नैस्त्रिंशिकः, त्रि, ( निस्त्रिंशः खड्गः प्रहरणमस्य । निस्त्रिंश+"प्रहरणम् ।"४ । ४ । ५७ । इति ठक् ।) खड्गधारी । निस्त्रिंशेन प्रहरति यः । तत्पर्य्यायः । असिहेतिः २ । इत्यमरः । २ । ८ । ७० ॥ असिहेतिकः ३ । इति शब्दरत्नावली ॥

नो, अ, ( नह+डो । ) नहि । अभावः । इत्यमरः । ३ । ४ । ११ ॥ ( यथा, अपराधभञ्जनस्तोत्रे । ७ ।
"नो शक्यं स्मार्तकर्म्म प्रतिदिनगहनं प्रत्यवायाकुलाख्यम् ॥" )

नोधाः, [ स् ] पुं, (नूयते स्तूयते इति । णु+"णुवो धुट् च ।" उणां ४ । २२५ । इति असिः धुट् च । यद्वा, नवं दधातीति । नव+धा+असुन् । नवशब्दस्य नोभावश्च । इति यास्कः । ) ऋषिभेदः । इत्युणादिकोषः ॥ ( यथा, ऋग्वेदे । १ । ६१ । १४ ।
"उभे वेनस्य जोगुवान ओणिं
सद्यो भुवद्वीर्य्याय नोधाः ॥" )

नोपस्थाता, [ ऋ ] त्रि, ( न उप समीपे तिष्ठतीति । स्था+तृच् । ) दूरस्थः । न उप समीपे तिष्ठति यः सः ॥ हीनार्थिविशेषः । यथा,—
"अन्यवादी क्रियाद्वेषी नोपस्थाता निरुत्तरः ।
आहूतप्रपलायी च हीनः पञ्चविधः स्मृतः ॥"
इति मिताक्षरायां व्यवहारमातृका ॥

नौः, स्त्री, ( नुद्यतेऽनयेति । नुद प्रेरणे+"ग्लानुदिभ्यां डौः ।" उणां २ । ६४ । इति डौः । ) नौका । इत्यमरः ।१ । १० । १० ॥ यथा, महाभारते । १ । १५० । ४—५ ।
"ततः स प्रेषितो विद्वान् विदुरेण नरस्तदा ।
पार्थानां दर्शयामास मनोमारुतगामिनीम् ॥
सर्व्ववातसहां नावं यन्त्रयुक्तां पताकिनीम् ।
शिवे भागीरथीतीरे नरैर्व्विश्रम्भिभिः कृताम् ॥"
एतेन यन्त्रवाहिता नौका प्रतीयते । कलेर नौका इति इष्टिम्बोट् इति च यस्याः प्रसिद्धिः ॥

नौका, स्त्री, (नौरेव । नौ+स्वार्थे कन् ।) नद्यादिसन्तरणार्थकाष्ठादिनिर्म्मितयानविशेषः । वारिरथः । इति त्रिकाण्डशेषः ॥ तत्पर्य्यायः । नौः २ तरिका ३ तरणिः ४ तरणी ५ तरिः ६ तरी ७ तरण्डी ८ तरण्डः ९ पादालिन्दा १० उत्प्लवा ११ होड़ः १२ वाधूः १२ वार्व्वटः १४ वहित्रम् १५ पोतः १६ । इति शब्दरत्नावली ॥ वहनम् १७ । इति जटाधरः ॥ * ॥

अथ निष्पदयानोद्देशः ।
"नौकाद्यं निष्पदं यानं तस्य लक्षणमुच्यते ।
अश्वादिकन्तु यद्यानं स्थले सर्व्वं प्रतिष्ठितम् ॥
जले नौकेव यानं स्यादतस्तां यत्नतो वदेत् ॥"

अथ कालः ।
"सुवारवेलातिथिचन्द्रयोगे
चरे विलग्ने मकरादिषट्के ।
अर्द्धेऽन्त्यसम्पत्तिरेकतोऽन्ये
वदन्ति नौकाघटनादि कर्म्म ॥ * ॥
अश्विकरांशुसुधानिधिपूर्व्वा-
मित्रधनाच्युतभे शुभलग्ने ।
तारकयोगतिथीन्दुविशुद्धौ
नौगमनं शुभदं शुभवारे ॥" * ॥
"वृक्षायुर्व्वेदगदिता वृक्षजातिश्चतुर्व्विधा ।
समासेनैव गदितं तेषां काष्ठं चतुर्व्विधम् ॥"
तद्यथा,—
"लघु यत् कोमलं काष्ठं सुघटं ब्रह्मजाति तत् ।
दृढाङ्गं लघु यत् काष्ठमघटं क्षत्त्रजाति तत् ॥
कोमलं गुरु यत् काष्ठं वैश्यजाति तदुच्यते ।
दृढाङ्गं गुरु यत् काष्ठं शूद्रजाति तदुच्यते ॥
लक्षणद्वययोगेन द्विजातिः काष्ठसंग्रहः ॥
क्षत्त्रियकाष्ठैर्घटिता भोजमते सुखसम्पदं नौका
अन्ये लघुभिः सुदृढ़ैर्व्विदधति जलदुष्पदे
नौकाम् ॥
विभिन्नजातिद्वयकाष्ठजाता
न श्रेयसे नापि सुखाय नौका ।
नैषा चिरं तिष्ठति पच्यते च
विभिद्यते वारिणि मज्जते च ॥
न सिन्धुगाद्यार्हति लौहबन्धं
तल्लौहकान्तैर्ह्रियते हि लौहम् ।
विपद्यते तेन जलेषु नौका
गुणेन बन्धं निजगाद भोजः ॥"
अथ लक्षणानि ।
"सामान्यञ्च विशेषञ्च नौकाया लक्षणद्वयम् ॥"

अत्र सामान्यम् ।
"राजहस्तमितायामा तत्पादपरिणाहिनी ।
तावदेवोन्नता नौका क्षुद्रेति गदिता बुधैः ॥
अतः सार्द्धमितायामा तदर्द्धपरिणाहिनी ।
त्रिभागेणोच्छ्रिता नौका मध्यमेति प्रचक्षते ॥
क्षुद्राथ मध्यमा भीमा चपला पटलाभया ।
दीर्घा पत्रपुटा चैव गर्भरा मन्थरा तथा ॥
नौकादशकमित्युक्तं राजहस्तैरनुक्रमम् ।
एकैकवृद्धैः सार्द्धैश्च विजानीयात् द्वयं द्वयम् ॥
उन्नतिश्च प्रवीणा च हस्तादर्द्धांशसम्मिता ।
अत्र भीमाभया चैव गर्भरा चाशुभप्रदा ॥
मन्थरापरतो यास्तु तासामेवाम्बुधौ गतिः ।
तासां गुणस्तु संक्षेपात् दृढ़ता च प्रकीर्त्तिता ॥"
अथ विशेषः ।
"दीर्घा चैवोन्नता चेति विशेषे द्विविधा भिदा ॥"
तत्र दीर्घा यथा,—
"राजहस्तद्वयायामा अष्टांशपरिणाहिनी ।
नौकेयं दीर्घिका नाम दशाङ्गेनोन्नतापि च ॥
दीर्घिका तरणिर्लोला गत्वरा गामिनी तरिः ।
जङ्घाला प्लाविनी चैव धारिणी वेगिनी तथा ॥
राजहस्तैकैकवृद्ध्या नौकानामानि वै दश ।
उन्नतिः परिणाहश्च दशाष्टांशमितौ क्रमात् ॥
अत्र लोला गामिनी च प्लाविनी दुःखदा भवेत् ।
लोलाया मानमारभ्य यावद्भवति गत्वरा ॥
लोलायाः फलमाधत्ते एवं सर्व्वासु निर्णयः ।
वेगिन्याः परतो या तु सा शिवायोत्तरा यथा ॥"
भोजोऽपि ।
"नौकादीर्घं यथेच्छं स्यात्तन्नतानि विवर्ज्जयेत् ।
हस्तसंख्या परित्याज्या वसुवेदग्रहोत्तरे ॥
षड्युत्तरमिता नौका कुलं हन्ति बलं धनम् ।
नवतेरुत्तरे यापि या चत्वारिंशतेः परा ।
एतेन चत्वारिंशतिषष्टिनवतिसंख्या तत्परतोऽपि ।
यावदपरदशकं तावदेव तत्फलमिति ।"
इति दीर्घा ।
अथोन्नता ।
"राजहस्तद्वयमिता तावत् प्रवरयोन्नता ।
इयमूर्द्ध्वाभिधा नौका क्षेमाय पृथिवीभुजाम् ॥
ऊर्द्ध्वानूर्द्ध्वा स्वर्णमुखी गर्भिणी मन्थरा तथा ।
राजहस्तैकैकवृद्ध्या नाम पञ्चत्रयं भवेत् ॥
अत्रानूर्द्ध्वा गर्भिणी च निन्दितं नामयुग्मकम् ।
मन्थरायाः परा यास्तु ताः शुभाय यथोद्भवम् ॥"
भोजोऽपि ।
"वाणाम्बुधरतो मानं नौकानामशुभं वहेत् ।
पञ्चाशद्दूर्द्ध्वादुत्तारं धननाशं त्रयोर्द्धतः ॥"
इत्युन्नता ॥ * ॥
"धात्वादीनामतो वक्ष्ये निर्णयं तरिसंश्रयम् ।
कनकं रजतं ताम्रं त्रितयं वा यथाक्रमम् ॥
ब्रह्मादिभिः परिन्यस्य नौकाचित्रणकर्म्मणि ।
चतुःशृङ्गा त्रिशृङ्गाभा द्विशृङ्गा चैकशृङ्गिणी ॥
सितरक्तापीतनीलवर्णान् दद्याद्यथाक्रमम् ।
केशरी महिषो नागो द्विरदो व्याघ्र एव च ॥